This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥अथ हिमवद्वर्णनंआरभ्यते॥तत्रपंचदशभिः कुलकमा
ह॥अथजयायनुमेरुमहीभृतोरभसयानुदिगंतदिदृक्षया॥अभिययोसहिमा
चलमुच्छ्रितंसमुदितंनुविलंघयितुंनभः॥१॥अथेति॥अथसोर्जुनोमेरुमही
भृतोहेमाद्रेर्जयायज्जयार्थंयानुशब्दोवितर्के॥नुपृच्छायांवितर्केचेत्यमरः॥र
भसोवेगः रभसोवेगहर्षयोरित्यमरःयद्वाविभ्रमप्रकारो तद्वसारभसया अ
तीवोत्कंठयेत्यावृत्त॥अशालीस्याद्वचप्रत्ययः दिगंतानांदिदृक्षयानुद्रष्टुमिच्छ
याभानोंतरिक्षंविलंघयितुंनु अतिक्रमितुंयासमुदितंसमुन्नतिनुमियदि
तमित्यर्थः॥कुतः उच्छ्रितमुन्नतंहिमस्याचलंअभिययो॥अत्राभिनिध्या
रिनानेकफलविशेषाभोक्तृत्वगुणनिमित्ताउत्थानक्रियोत्प्रेक्षा॥साचव्य

जकाप्रयोगात्प्रतीयमानेति॥संक्षेपः कुतविलंबितंक्षतं कुतविलंपितमारा॥नभो
भराविति लक्षणात्॥१॥तपनमंडलदीपितमेकतःसततनैशतमोवृतमन्य
तः॥हसितभिन्नतमिस्रचयंपुरःशिवमिवानुगतंगजचर्मणा॥२॥तपनेति॥ए
कतः एकस्मिन् भागेसूर्यबिंबकिरणैः सलिल॥पतनेनमंडलेन दीपितं प्रकाशितं
अन्यतोन्यस्मिन्भागेसततंनेनविद्धेनैशेनरात्रिभवेनतमसावृतं एकत्रारा
त्र्याचान्यत्रसंगतमित्यर्थः अतएवपुरोग्रेहसितेनहासेनविभिन्नतमिस्र
चयंनिरस्ततमस्तोमंतथागजचर्मणाअनुगतंपश्चाद्ध्याप्तंपश्चाद्भागेदूशायोर
नुद्धस्समरः॥शिवमिवस्थितं॥तपनतेजः प्रकाशोयस्यकानेकेकुत्रचित्प्रति
समाप्यत इतिमत्वातिशयोक्तिः॥२॥दीपितेनभास्करलोकेनिवासिभिःकलेति

M 1365
Acc. No:- ~~2503~~
Title:- ~~किरातार्जुनीयम~~
Author:- ~~भारवि~~
Subject:- poetry
~~पेज~~ :- 26

KKSU LIBRARY
RAMTEK
441 106
M 1365
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

केतमदृष्टपरस्परैः॥ प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगता
मिव शंभुना॥ ३॥ क्षितीति॥ परस्परे अन्योन्ये कर्मव्यतिहारे सर्व
नाम्नो द्वे भवत इति वक्तव्याद्वस्य द्विर्भावः समासवच्च बहुलेषु समासवत्
न तदा प्रथमैकवचनं पूर्वपदस्येति वक्तव्यत्वात् प्रथमैकवचनं कृत्वा
दिस्याद्विसर्जनीयस्य सत्वं बहुवचनं चान्योन्यवत् यथा माघे अन्यो
न्येषां पुष्करैरामृत्तं तामिति अदृष्टाः परस्परं ये ते अदृष्टपरस्पराः
तैः तथोक्तैः क्षितौ नभसि स्वर्लोके च निवसंतीति तैः तथोक्तैः भू
र्भुवः स्वर्लोकवासिभिरित्यर्थः एतं निकेतनं एतास्पदं अत ए

शंभुना विभुतां स्वसामर्थ्यं प्रथयितुं अभिनिर्मितं जगतां प्रतिनिधिं प्रतिकृति
निर्मितमिति उत्प्रेक्षा॥ प्रथेतिति रस्त्री पुंसि॥ प्रतिनिधिरुपमानस्यादिसमरः
त्रैलोक्यस्याप्युपमपरिच्छेद्यश्चेतिभावः॥ ३॥ भुजगराजसितेन नभश्रिता क
नकराजिविराजितसानुना॥ समुदितं निचयेन तडित्वतीं लघयता शरदंबु
दसंहतिं॥ ४॥ भुजगेति॥ पुनश्च भुजगराजसितेन शेषाहिधवलेन नभश्रिता ग
गनस्पृशा कनकस्य राजिभिः॥ विराजिताः सानवो यस्य तेन तथोक्तेन अत एव
तडित्वतीं शरदंबुदसंहतिं लघयता लघूकुर्वता तत्तुल्येनेत्यर्थः॥ अत एवोपमालंका
रः निचयेन शिरपरोच्चयेन समुदितं समुन्नतं॥ ५॥ मणिमयूखचयांशुकभासुराः
सुरवधूपरिभुक्तलतागृहाः दधतमुच्चशिलांतरगोपुराः॥ पुरइवोदितपुष्पवनाभुवः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मणीति॥पुनः मणिमयस्थलचयाः॥अंशुकानीवृपत्ताकादिनीचलैः भास्वराः सु
रवधूभिः परिभुक्ताः लतागृहा इव यासु ताः तथोक्ताः उद्यानि शिलांतराणि
लामध्यानि गेहपुराणीव यासु ताः॥ उदितास्तुर्जितानि पुष्पाणां वनानि यासु ताः॥
अत एव पुर इव स्थिताः भुवः स्थलं॥५॥अविरतोज्झितवारिविपांडुभिर्विरहितै
रचिरद्युतितेजसा॥ उदितपक्षमिवारतनिस्वनैः पृथुनितंबविलंबिभिरंबुदैः॥
६॥अविरतेति॥अवितरं अविच्छिन्नं उज्झितवार्योऽन्वयि मंतरस्यार्थः॥अ
त एव विपांडवस्ते रविरतोज्झितवारि विपांडुभिः॥ अत एव हिमवत
पक्षत्वं संभवतीति भावः अचिरद्युतितेजसा विरहितैः विद्युत्तेजो
विरहितैः आरतनिस्वनैः प्रशांतगर्जितैश्च अन्यथा पक्षत्वहानिः स्या

दिति भावः॥पृथुविलंबिभिः महाकटकसंगिभिः कटकोस्त्री नितंबोद्रेरित्य
मरः अंबुदैरुदितपक्षं संजातपक्षमिव स्थितं॥शाकृच्छिन्नपक्षस्यापि हिमाद्रेः॥
धवलांबुदसंबधासुनः पक्षोत्थानमुत्प्रेक्षते संभावनास्यादुत्प्रेक्षावस्तुहेतु
फलात्मना॥६॥ दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः
विविधकाममहितामहितांभसः स्फुटसरोजवनाजवनानदीः॥७॥ दधतमिति
पुनश्चरवनिरेषामस्तीति योनि स्येनेसाकरिः स्त्रिराकरजेः॥खनिः स्त्रियामा
करस्यादित्यमरः॥करिभिः गजैः कृतभिः क्षतैः रुग्णैः समवतारेषु तीर्थेषु
समैरविषमैः असमैरनन्यसदृशैः नैरंतरूपकल्पितास्तथा महिताभसः श्लाघ्यो
दकाः अत एव विविधेभ्यः कामेभ्यः अवगाहाद्युपभोगेभ्यो हिताः अनुकूलाः च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्थीतदर्थेसुशादिनासमासः स्फुयनिविकच्यानिसराजयनानियासुता: जवना:
वेगवती: जुच्चं कम्येस्यादिनापुच्चनदी: दधातंयमकच्छस्यनुप्रासादभेदस्यात्॥
स्यपमेवालंकार: अर्थालंकारस्तत्पुच्चय:॥तस्यानिदुष्करत्वात्॥रसपोषो
पिनाद्रियते॥तदुक्तं॥प्रायशोयमकेचित्रेरसवधिर्नगम्यते॥७॥ननवि
नि जपाकुसुमात्विषांद्युति मतानिकरेण मलाद्मनां॥ विहितसांध्यमय
स्यमिवक्वचि निचितकांचनभित्तिषुसानुषु॥८॥नवेति॥पुनश्चनवा
निविनिर्गाणिजयानिजपाकुसुमानिताम्रपुष्पिकाकुसुमानितेषांत्वि
षइवत्विषोयेषांतेषांओद्रपुष्पजपाकुसुम रूपिकाहैमपुष्पिकेत्यम
र: घुतिमतांमलाद्मनांमणीनांपद्मरागाणामित्यर्थ:॥विशेषणसाम

र्थ्यात्॥निकरेणसमूहेनहेतुनाक्वचित् निचिता: संपादिता: कांचनभित्तयो
येषुसानुषुविहिता: रचिता: सांध्या: सध्यायांभवा: मयूखा: यस्मिन्सं
नमिवस्थितंकांचनभित्तिषुपद्मरागप्रभाप्रसरादुदितसंध्यारागमिवभाति
इत्युत्प्रेक्षा॥९॥पृथुकदंबकदंबकराजितंग्रथितमालतमालवनाकुलं॥
पलघुतुषारतुषारजलच्युतंधृतसपानसदाननदंतिनं॥१०॥पृथ्विति॥पुन
श्चपृथुभि: कदंबकदंबकै: नीपनिकुरंबै: राजितं॥कदंबमाह: सिध्दार्थेनीपे
चनिकुरंबकदंबस्युभयत्रापीतिविश्व:॥स्त्रियांतुसंहतिर्वृंदंनिकुरंबंकदंबक
मित्यमर:॥ग्रथितमाले: बधपंक्तिभि: तमालवनै: तापिघवनै:राकुलमा
कीर्णं॥कालस्कंधस्तमालस्यात्तापिछोपीत्यमर:॥पुलेतुषारमल्पशीकरं

कि० ५

यत्तुषारजलं हिमोदकं तत्तस्य श्चोतन्निवर्षन्नितं तथोक्तं तुषारो हिमशीकरो हि वि
श्वः ॥ अन्येभ्योपि दृश्यत इति क्विप् ॥ समग्राः सदानाः शोभन्ते नागा यत्र श्च येदं
तिनस्ते ध्वजाः येन तं तथोक्तं ॥ ९ ॥ रहित र[illegible] लच यान्नशिलोच्चयान्नपलताः
भवनान्दरीभुवः ॥ विपुलिनान्पुरुहान्सरिद्वधूरकुसुमान्दधतं न महीरुहः ॥ १० ॥
रहितेति ॥ पुनश्च रहितरत्नचयान् रहितः परित्यक्तः रत्नचयो यैस्तान् रत्नरा
शिरहितान् शिलोच्चयान् शिखराणि च न दधतं ॥ अपलताः भवनाः लताग्न
रहिताः दरीभुवः गुहाप्रदेशान्न दधतं ॥ दरी तु कंदरो वा स्त्री देवखात विले गुहा इत्य
मरः ॥ विगतानि विपुलिनान्यंबुरुहाणि च यासां ताः सरितो वध्व इव सरिद्वधूः ता न
दधतं ॥ अत्र सरितां च वध्वौपम्यात् पुलिनांबुरुहाणां च स्तनजघनोपमानत्वं गम्यते

५

ॐ

असुमान् महीरुहो वृक्षान्न दधतं किंतु रत्नादिसंपन्नानेव शिलोच्चयादीन् दधतमि
त्यर्थः ॥ मत्वर्थविभाषया नात्र नञ् समासः १० ॥ व्यथितसिंधुमनीरशनैः शनैरमरलो
कवधूजघनैर्धनैः ॥ फणभृतामभितो वितताततं दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥
व्यथेति ॥ अनीरशनैः अनिर्मैरखलैः सरशनैरित्ति भावः घनैः निबिडैः ॥ अमर
लोकवधूजघनैः शनैः व्यथितसिंधुं क्षोभितनदीकं ॥ अमममपरस्त्वर्ग इति भावः ॥
रम्याः लताश्च बकुलाः केसराश्च दयिताः प्रियाः येषां तैस्तथोक्तैः विशारदोमघ्पगं
धो बकुलः सचकेसर इति वैपवैः ॥ फणभृतां कुलैरभितस्ततं व्याप्तं तथा विततं विस्त
तं ॥ ११ ॥ ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपांडुभिः ॥ अविचलं शि
खरैरुपविभ्रतं ध्वनितसूचितमंबुमुचां चयं ॥ १२ ॥ ससुरेति ॥ पुनश्च अनेकाः वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(5)

कु० ५

चित्राः मणिप्रभाः येषां तैस्तथोक्तैः हिमेन पांडुभिः शिखरैः ससुरचापं सेन्द्रचापं
अपपयो निर्जलः अत एव विशदश्च तं अपपयो विशदं अविचलं देवान्निश्चलं च
अतः शिखरशाकास्पदीभूतमित्यर्थः किंतु ध्वनितेन गर्जितेन सूचितं ज्ञापितं॥
अंबुमुचां च यं उपविमृतं॥ अत्र कविकल्पितसादृश्यात्॥ शिखरमेघसंदेहो मेघ
निश्चयान्निश्चयांतः संदेहालंकारः॥१२॥ विकचवारिरुहं दधतं सरः सकलहंसगणं
शुचिमानसं॥ शिवमगात्मजया च कृतेर्ष्यया सकलहंसगणं शुचिमानसं॥१३॥ वि
कचेति॥ विकचवारिरुहं विकसितारविंदमित्यर्थः॥ शक्तिसामर्थ्यात् कलहंसग
णैः सह वर्तत इति सकलहंसगणं॥ कादंबः कलहंसस्यादित्यमरः॥ यद्वा सकलाः स
र्वे हंसगणाः यस्मिन् तत् थोक्तं॥ शुचि नित्यं निर्मलं मानसं मानसाख्यसरो ध्यानं ६

किंच कृतेर्ष्यया कुतश्चिन्निमित्तात् कुपितमनस्येत्यर्थः॥ अगात्मजया पार्वत्या सकलहंस
विवादं सगणं सप्रथमं॥ गणाः प्रथमसंख्योघाः इति वैजयंती॥ शुचिमासेन अ
विद्यानिर्मुक्तचित्तं शिवं च दध्यनं॥ एतेन हंसकलहेन शिवे लक्षणयमस्योक्तः १३
मूलविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना॥ मुहुरनुस्मरप
तमनुक्षपं त्रिपुरदाहमुपागतिसेविनः॥१४॥ मूलेति॥ दिवं अभितो दिवोभि
मुखं॥ अभितः परितः इति यागमः॥ व्योमयानानि विमानानि देवयानानि च॥
व्योमयानं विमानोऽस्त्री इत्यमरः॥ तेषां गणान् ज्वलयता प्रदीपयता मित्रं ह्रस्वः
ओषधिजेन तृणविशेषजन्येन कृशानुना अनुक्षपं प्रतिक्षपा निशायामभ्यमी
भावः उमापतिसेविनः प्रमथादीन्॥ गतिबुद्धीत्यादिना द्विकर्मसंत्रयाणां पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि० ७

५ ध्धतमुन्नतसानुसमुध्धतां धनसितव्यजनामिव जान्हवीं ॥१४॥

विततेभि॥ विततशीकरराशिभिर्विस्ततांबुकणसंघे पंचमसर्गः टीका

राणां समाहारस्त्रिपुरं तद्धिनार्थे सादिनासमासः पत्त्रादिभ्यः प्रतिषेधो वक्तव्य
इति स्त्रीलिंगप्रतिषेधात्तस्य हरं त्रिपुरहरं मुहुः स्मरयंतं नच धीमर्थे साग्निना
दृश्मिस्यत्र षष्ठी किंनस्यात्तस्याः शेषार्थविधानात् शेषत्वस्य वेव क्षिकत्वा
दिति ॥ अत्र कविसम्मतसादृश्यात्स्मृतिरिति स्मरणालंकारः ॥१४॥ वितते
शीकरवर्षिभिरुद्भिरेतेरुपरुरोधयिवानिभिरंबुभिः ॥ कुतः उपरोधेन विव
र्तिभिरंबुभिः हेतुना धूतसितव्यजनामिव गंगां नाम लवचामरामिव स्थितामि
त्युत्प्रेक्षा उन्नतसानुसुसमुध्धृतां महतां जान्हवीं गंगां दधतं ॥१५॥ अनुचरेण
धनाधिपतेरथो नगविलोकनविस्मितमानसः सजगदे वचनं प्रियमादरा
न्मुखरतावसरे हि विराजते ॥१६॥ अनुचरेणेति ॥ अथोनंतरं ॥ मंगला

७

नंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेस्यमरः ॥ धनाधिपतेरनुचरेण यक्षेण नगविलो
कनविस्मितमानसः सोर्जुनः आदरात्प्रियं वचनं जगदे गदितः गदतेर्ब्रुवन्नर्थस्य
दुहादिकत्वादप्रधानेकर्मणि लिट् ॥ अपृष्टपरिभाषणदोषं परिहरति ॥ मुखरेति
मुखरता वाचालत्वं अपृष्टपरिभाषित्वमपि ब्रूयादिति भावः १६ ॥ अलमेष वि
लोकितः प्रजानां सहसा संहतिमंहसां विहंतुं घनवर्त्म सहस्रधेव कुर्वन्हिमगौ
रैरचलाधिपः शिरोभिः ॥१७॥ अलमिति हिमगौरैः शुभ्रैः शिरोभिः शिखरैः घ
नवर्त्म खं सहस्रधा कुर्वन् विपाटयन्निवेत्युत्प्रेक्षा ॥ एषोचलाधिपो हिमवान्वि
लोकितो दृष्टमात्र एव प्रजानां अंहसां संहतिं पापसंघातं सहसा सद्यः विहंतुं अलं
समर्थः ॥ पर्याप्तमिव च तेष्वलमर्थेष्विति सुमनः ॥ औपगवस्तिकत्वं विषमे हस्स
जागुरुसमेसरया छंदसि कंते दोपपूर्वं ॥१७॥ इह दुरधिगमैः किंचिदेवागमैः स

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त तमसुलरंवर्णयंसंतरं ॥ अमुमतिविपिनंवेददिग्व्यापिनंपुरुषमिवपरं
पद्मयोनिः परं ॥१८॥ इहेति ॥ इह अस्मिन्पर्वतेसुतरनभवंबीस्सुतरंदु
स्तरमित्यर्थः तरतेः स्वल्पप्रत्ययः अंतरंमध्यभागपुरुषेतु अंतरंतत्वंदुर
धिगमैः दुर्गहैरागमैः पुराणादिभिः किंचिदेवसततंवर्णयंति ॥ ननुकार्त्स्न्ये
नप्रत्यक्षेणनापिनिःशेषंज्ञातुंमशक्यत्वादितिभावः किंतुअतिविपिनंअ
तिविपिनंअतिगहनंदिग्व्यापिनंअमुंगिरिंपरंपुरुषंपरमात्मानमिवपरंके
वलं ॥ परमव्ययमित्यमरः ॥ पद्मयोनिर्ब्रह्मेववेदनान्यदृत्यर्थः
वेदोऽतःयेवेतिरलादेशः ॥ अत्रोपमायमकयोः संसृष्टिः क्षमाध्वन्तुरसैयाति ग
नोर्तनोगाक्षमा ॥१९॥ रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ॥

९

नयतिसंततमुत्सुकतामयंधृतिमतीरुपकांतमपिस्त्रियः १९ रुचिरेति ॥
असौगिरिः रुचिराणिपल्लवानियानिपुष्पाणिचयेषांतैस्तथाभूतैः ॥ लता
गृहाः येषुतैस्तथोक्तैः उपलसज्जलजैः जलराशिभिः सरोभिः उपकांतंकां
तसमीपेधृतिमतीः ॥ धैर्यवतीरपिस्त्रीपरधानपिप्रियान्गणयंतीस
र्थः ॥ अथवाउपकांतंधृतिमतीः तुष्टिमतीरपिसुरतान्तसाअपिपुनरपि
उत्सुकतांनयतीत्यर्थः ॥ उभयत्राप्युद्दीपकत्वादतिशयोक्तिः वृत्तं ११
सुलभैः सदानयवतायनतानिधिगुह्यकाधिपरमैःपरमैः ॥ अमुनाध
नैः क्षितिभृतातिभृतासमतीत्यभातिजगतीजगती ॥ २०॥ सुल
भैरिति ॥ नयवतानीतिमता अयवता भाग्यवताचखलपैर्नोभैरित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

8

अयः शुभावहो विधिर्विधिरित्यमरः॥ निधीनां गुह्यकानां चाधिपं कुबे
रं रमयंतीति तानि कर्मण्यपणू॥ परमेरुरुत्प्रेक्षः धनेकरणैरमुना॥ अतिनिभ
ता अतिभता पूर्णासि तीजगतीपृथ्वी जगती स्वर्गपातालौ लोको समती
स्यजती स्यभाति अमानुषैरपि दुर्लभाः संपदोत्र भवंतीति भावः॥ अत्र
धनैरतिभृतेति पदार्थस्य विशेषणग॥ साजगदतिक्रमण हेतुत्वोक्त्या
काव्यलिंगस्य यमकेन संसृष्टिः प्रमिताक्षरा सजससैरुदिता॥२०॥ अ
खिलमिदमपुष्य गौरी गुरोस्त्रिभुवनमपिनेतिमंन्येनुलो॥ अधिनसति
सदायदेनं जनैरविदितविभवो भवानीपतिः॥२१॥ अखिलमिति॥ अ
मुष्य गौरीगुरोर्हिमवतः इदमखिलं त्रयाणां भुवनानां समाहारस्त्रिभुवनं

॥ नां समाहारस्त्रिभुवनमपित द्विशर्थं स्यादिनासमासः पात्राद्यित्वान्नस्त्रीत्वप्रति
षेधः तुलां साम्यं धत्तेनेति इति मंन्ये मघन्नः जनैरविदितविभवो ज्ञाते महिमा
भवानीपतिः॥ सदा एनं गिरिमधिवसति॥ अस्मिन्वसतीत्यर्थः॥ उपाध्या
इवसइति द्विकर्मत्वं॥ अतोयं धर्मक्षेत्रइति भावः प्रभावत्वं॥ त्परशाप्यवि
रतिनैनोरौप्र भोतिलक्षणान्न॥२५॥ वीतजन्मजरसः परं शुचि ब्रह्मणः
पदमुपैतुमिच्छतां॥ आगमादिव तमोपहादितः संभवंतिमतयो भवच्छि
दः॥२२॥ वीतेति॥ वीते निवृत्ते जन्मजरसौ यस्यतद्वीतजन्मजरं तस्य वीतज
न्मजरसः॥ जरायाजरसन्यतरस्यामिति जरसादेशः॥ अनुदात्तचिच्छेरिषस्यात्
परश्चेनस्यादेशश्चान्केषेत्यात्॥ तथाहिटाङसिङसामिति स्तनएतिस्यादेशाधनात्

(७)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु० पंचमस०
१८ १०

परस्याजरसादेशवभाषभाष्येस्यपास्तत्रेकारमतेयत्तज्ज्ञापकत्वात्परबाध
नं॥१॥भवेत्तएपियाङःस्योनफलङःसिसंभवः॥मतद्वयेपितन्नुल्याङःसिप
त्पूर्वबाधनं॥२॥परस्याजरसोदेशस्तस्मात्स्यादेशबंधनात्॥ज्ञापकेय
चेयङःस्योर्यभिदेशाद्भिन्नादिति॥३॥ईकारदीर्घयोस्तजवेष्यर्थं तत्रतोवि
नाएतेत्रेस्ववर्णदीर्घचरूपसिद्धिर्भवेयतः॥सार्थस्यज्ञाक्षरस्यागात्मे
क्तेतज्ज्ञापकंफलं॥४॥स्यातश्चाजरसादेशजगोपूर्वस्यबाधनात्॥स
मर्थनप्रपंचेतुभाष्यकैय्यटयोःस्फुटः॥५॥एवंसतिपदत्रजरसंइतिकेषां
चित्पाठांतरकल्पनंतदज्ञानविजृंभितमेवश्लक्ष्णः परमाणवः॥संबंधि
परमुत्कर्षंश्च्चिविष्कलंकंपपयत इतिपदंस्थानंनादास्पदल णाणांमुनिनि

सर्थः॥उपेतुंप्रामुमिच्छतांमुमुक्षुणां आगमात्शास्त्रादिवतमः॥अपहंतीतिन
मोपहंतस्मादविधानिवर्तकात्॥अणकेशनमसेरिजप्रत्ययः॥इतोस्मात्गिरेः
भवंधिंदतीतिभवच्छिदः संसारनिवर्तकाःसलुविशेषसादिनाक्षिप॥मतय
स्तचलोगानिसंभवंतिक्षेत्रविशेषस्यापिज्ञानाधायकत्वादिसाशयः॥गच्छे
बलभोगभूमिः॥किंतुमुक्तिक्षेत्रमपीतिपौनासर्थरथोद्भुतायत्तं॥रु आराधि
हरथोद्धतालगो॥२२॥दिव्यस्त्रीणांसच्चरणलाक्षारागराभापातेनिपतितपु
ष्पापीडः॥पीडाभाजःकुसुमचिताःसाशंसंशांसस्यास्फिततसुरतविशेषंशय्याः
२३दध्येति॥अस्मिन्गिरौचरणलाक्षारागैःसह वर्तेतथविशेषं रतिलथोकः॥
धेनुकपुरुषायितादिवधेषुस्त्रीपादलस्पृशातत्रागांधिताइसर्थः॥निपतिताः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि॰
११

ध्यानतकरणेस्त्रीणामधोमुखस्यात्॥भ्र वा॥पुष्पापीडाः कुसुमसेखराः माल्
मात्तथोक्ताः॥शिखास्वापीडसेखराविसमरः॥पीडभाग्नोविमर्दभाग्नोभ्रंगमर
स्यइत्यर्थः॥भ्रमरप्रेंखोच्चितादोलर्वत्रभ्रमविपरिभ्रमणसंभयादिति भावः॥कुसु
मेश्चित्ताः कुसुमच्चिताः इभमार्जारादिकरणेषुस्तनमुखा घनपनानांशय्याल ल
स्याधिसात् मार्दवामकुसुमास्तताइत्यर्थः॥दिव्या स्त्रीणांसंबंधिन्यः शेरतेआस्थि
तिशय्याः॥नण्यानिसंज्ञायासमज्जनिषदेत्यादिनाक्यप्॥रागा णात्तेरागोत्केरस
त्रिसंज्ञसः॥सत्तव्यः सुरतविशेषः॥तंजातावेकवचनं सुरतविशेषादिस र्भः॥
शंसंतिसूचयंतीत्यर्थः॥भ्रत्र स्त्रीक्षारागादिपदार्थानांसुरतविशेषशंसनंप्रतिवि
शेषणगत्याहेतुत्वात्॥काव्यलिंगंतघमगेनसंसज्यते॥जलधरमालावृत्तं॥अ

पंचमसर्ग
११

ध्यंगेः॥स्याजलधरमालाम्भौसेमौ॥धेनु धेनुकादिलक्षणंसुरतिरहस्ये॥न्यस्तरु
युगुलानिभेपदेयातिदेतिकटिरूढपल्लभा॥अगतादिशानेरधोमुखीधेनुकंस्त्र
मदुन्नतंप्रिये॥१॥स्त्रियथाभ्रमतिचल्लभेप्रियमायोषिदाचरतियल्लभाप्रित॥ध्यनंत
रंतमिदंयदिप्रियास्यादधोमुखन्मुष्पकारतिः॥२॥तत्करिसमधिरूढवल्लभः॥
स्याच्चपादिपश्चुसंस्थितस्थितिः नक्रवद्भमतिकुंचितांघ्रिकं भ्रामरंहिजपनेसमु
ज्झगे॥३॥सर्वतः कटिपरिभ्रमोयदिप्रेरवपूर्वमिदमुक्तमुत्तितं॥मुयतः स्तनभुजा
स्यमस्तकामुन्नतांस्त्रियमधोमुखीस्त्रियं॥४॥कामतिस्मरकरस्रवमल्लनेवल्लभे
करिपदंतदुच्यते॥प्रसारितेपाणियदिशय्यास्पृशिमुखोरासि॥उन्नतायांस्त्रियःक
ध्यांमार्जारिकरणंस्मृतं॥इतिग्रंथांतरे२२गुणसंपदासमधिगम्यपरंमहि

(१४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानमत्र महितेजगतां॥ नैशातितिश्रिमदृशाधिपतेनोचिरमंतिनज्वलित
मोषधयः॥२४॥ गुणेनेति॥ जगतां महितेजगद्भिःपूज्येमतिन्नक्षीस्यादिनावर्न
मानेक्तः॥ कस्यवर्तमान इतिषष्ठी॥ अत्रेतिमयसौषधयस्तृणज्योतिंषिन
यशातिनिअधिपतौ नीतिसंपन्नेराज्ञिश्रिमः॥ संपदर्नगुणसंपदाक्षेत्र
गुणसंपत्त्या अन्यत्रसंध्यादिगुणसंपत्तापरमहिमानंउभयत्रापिपराति प्रशाम
नादिसामर्थ्यसमधिगम्य ज्वलितुं प्रकाशितुंनचिरमंतिअचिरंतंज्वलयंतीत्यर्थः
अन्यत्रराज्ञायेवेत्यर्थः॥२४॥ कुररी०गणः॥ कुंतरयस्तरवः कुसुमानतः सफम
लंकमलं॥ इहसिंधवश्चवरणावरणाः करिणांमुदेसनलदानलदाः॥२५॥ कुरु
रीति॥ इहाद्रौकुररीगणः॥ उत्क्रोशसंघः उत्क्रोशाकुररोसमाविस्यमरः॥ कुंतरनः॥

कृताःरवाःयेनसःतरवः कुसुमैरानताःफमलंअंबुसपरंकमलंजलपद्मयोरिवि
श्वः॥ किंचवरणाःवरुणद्रुमाःतेषांमावरणंप्रासांताःवरणोवरुणसेतुस्ति
क्तशाकः कुमारकइत्यमरः॥ सनलदाःसोशीराःमूलेस्योशीरमस्त्रियां॥ अ
भयंनलदंसेव्यमित्यमरः॥ अनलंसंतापंघ्नंतिखंडयंतिशामयंतीत्यनलदाः॥
सनेदालेभ्यतःअनलदाःसिंधवःकरिणांमुदेभवंतीतिशेषः॥ नमुत्रापुष्कलैवै
परिसमितिभावः॥ अस्मिन्श्लोकद्वयेप्यमिताक्षराव्रत्तं॥२५ सादृश्यंगत
मपनिद्रचूतगंधैरामोदंमदजलसेकजंदधानः॥ एनस्मिनमदयतिकोकिलान
कालेलीनालिःसुरकरिणांकपोलकाशः॥२६॥ सादृश्यमितिएतस्मिन्नद्रौअ
पनिद्रचूतगंधैःसादृश्यंगतंफुल्लाम्रपुष्पसादृश्यंगतंमदजलसेकजंआमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंपरिमलंदधानः।नीकनालिरसंसक्तोऽनंगःसुरकरिणांकषणेनतत्रैनिकाषः
कपोलानांकाषः॥कषणस्थानंनुमस्कंधादिअकाकेलेवसंतानतिरिक्तेकोलि
पिकोकिलानांमेनिमितिरुचः॥अत्रवसंतारूपकारणाभावेपिमदारव्य
कार्योत्पत्तिकथनात्विभावनालंकारः॥तदुक्तं॥कारणेनविनाकार्यस्यो
त्पत्तिर्विभावनाइति॥साचन्तरंगधेःसादृश्यमितिउपमया॥आमोदंदधा
नइतिपदार्थहेतुककाव्यलिंगमलंकारेण॥अंगांगिभावेनसंकीर्यते॥
कोकिलानांमदंगंधुपूतगंधर्भा॥२६॥सनाकवनितंनितंबरुचिरंचिरं
सुनिनदैर्नदैर्वृतममुं॥मताफणवतोवतोरसपरापरास्तवसुधासुधाधि
वसति॥२७॥सनाकेति॥पुनश्चसनाकवनितंसामरसंनितंबैःकटकैःरु

॥

चिरंसुनिनदैः॥श्राव्यघोषैर्नदैःप्रवाहैः॥वृतंममुममुष्मिन्गिरावित्यर्थः
॥उपान्वध्याङ्वसइतिकर्मत्वं॥अवतोधोलोकरक्षकस्यफणवतोनागराज
स्यमता इष्टामतिबुद्धीत्यादिनावर्तमानेक्तः॥तद्योगात्॥षष्ठीसैरेनपरा
उत्कृष्टापरास्तवसुधासत्कलोकासुधाअमृतंआधिवसति॥अत्रान्यत्र
भुमंडलेकुत्रापिसुधानास्तीत्यर्थः॥मेरुप्रतिभटोयंगिरिरिभावः॥अत्र
प्रस्तुतविशेषणसाम्यात्॥अप्रस्तुतस्यप्रतीतिःसमासोक्तिरलंकारः॥सयम
केनसंसृज्यते॥जलोध्दतगतिर्वृत्तं॥रसैर्जसजसाजलोध्दतगतिरिल
णंश्रीमल्लगन॥भवघोषयःप्रौढपाः३व्यानचानिहरिचंदनपल्लवानि॥
हरिचंदनपल्लवानि॥अस्मिन्राजिअमनुदेश्चसरोजवाताः स्मर्तृदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिनद्भिः सुरसुंदरिभ्यः॥२८॥ श्रीमद्विप्रदीपाः नवानि हरिचंदनपल्ल
वानि सुतरुकिसलयान्येव शय्याः हरिचंदनमाम्नातं गोशीर्षे सुरपा
दपे इति विश्वः॥ रतिश्रमनुदः सुरतश्रमहारिणः सरोजवाताश्च
सुरसुंदरीभ्यः॥ क्रियाग्रहणाच्चतुर्थी दिवौदिवं॥ अभि गर्धेत्यादिना
षष्ठीस्यात् दूरूपकत्रयं स्फुटमेव॥ वसंततिलकावृत्तं॥२९॥ इ
शार्थमंभसि चिरायतपश्चरंत्यायादोविलंघनविलोलवि
लोचनायाः॥ आलंबताग्रकरमत्र भवान्भवान्याः श्रोतोनिदाघसलि
लांगुलिनाग्रकरेण॥२७॥ ईशार्थमिति॥ ईशायेति ईशार्थं

यथा तथेति क्रियाविशेषणं॥ अर्थेन सह नित्यसमासः॥ सर्वलिंगता च वक्तव्या
चिराय चिरं अंभसि तपश्चरंत्याः॥ अत एव यादोविलंघनविलोलविलोच
नायाः जलजंतुविघट्टितचकितेक्षणायाः॥ तपसोपि अधिकं दृष्टेयेवतया
विलोभयंत्याः इति भावः॥ यादांसि जलजंतवस्समरः॥ भवान्याः भवपत्न्याः
प्रयोगकालापेक्षया यार्थनिर्देशः॥ इंद्रवरुणेत्यादिनाङीप्॥ अनुगागमश्चक
रैकदेशस्यापि करस्यात्॥ अग्रं चासौ करश्चेति समानाधिकरणसमासः॥
अत एव षामनः॥ हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदाभेदाविति लमग्न
करं भवः शिवः श्रोतोनिदाघसलिलांगुलिनास्वबुद्ध्येपांगुलिनेति सात्विको
दयोक्तिः करेणात्र गिरावालंबत गृहीतवान्॥ अत्राद्भुतानि षट्तानि तस्य प्रस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रि०
१५

वदभिधानात्॥भाविकालंकारः॥अतीतानागतेयत्रप्रत्यक्षत्वेनलक्ष्यते॥अत्र
भूताना र्थेकथनात्॥भाविकंतदुदाहृतमितिलक्षणात्॥वसंततिलकावृत्तं॥
२१॥येनापविद्धसलिलःस्फुटनागसद्मादेवासुरैरमृतमंबुनिधिर्ममंथे॥
व्यावर्तनैरहिपतेरयमात्तांकःखंव्यालिखन्निवविभातिसमंदराद्रिः॥२०॥येने
ति॥देवाश्चासुराश्चदेवासुरेः॥येषांचविरोधः शाश्वतिकः इतिनेकवद्भावः॥
कश्च यतएषांकार्यविरोधान गोव्याघ्रादिवत् शाश्वतिकत्वात्॥येनमंदराद्रि
णामंथदंडीकृतेनेतिभावः॥अपविद्धसलिलः प्रक्षिप्तजलः॥अत एव॥स्फु
टनागसद्मपातालंयस्मिन्सोंबुनिधिः॥अमृतममंथेमथितः॥मथ्नाते
र्नैह्किकर्मकत्वाद्यदेवाद्यप्रधानेकर्मणिलिट्॥अहिपतेः मंथगुणीकृतस्य

१५

धासुकेरित्यर्थः॥मंथानंमंदरंकृत्वायेत्रंकृत्वानुवासुकिमित्यादिभारतवच
नात्॥व्यावर्तनैर्वेष्टनैरहितांकः॥कृतचिन्हः सोयंमंदराद्रिः खंव्यालि
खन्नूपाटयन्निवाविभाति॥अत्रोल्लेखस्यानुपातेनैवलेखनोल्लेखणाद्यनु
पात्तगुणनिमित्तात्क्रियास्वरूपोत्प्रेक्षा॥२०॥नीतोघ्राया मुकुरनागि
रस्मेरुत्स्नेहानीलाभेविरचितपरभागरत्नेः॥ज्योत्स्नाशंकामिहवि
तरतिहंसश्येनीमध्येप्यनतःस्फटिकरजतभित्तिच्छाया॥२१॥नीतेति॥
इहाद्रौअशिशिररश्मेरुष्णांशोरस्त्रेर्मयरवेः॥संक्रांतेरितिभावः॥नी
तोघ्रायाचिस्तारितेत्यर्थः॥तथाआनीलाभैरसितप्रभैःरत्नैःइंद्रनी
लैःविरचितपरभागात्सन्निधानात्लब्धोत्कर्षेत्यर्थः॥हंसश्वेतपता

(15)

इयलयवर्णौ हस्त्येनी विशदश्येतपांडुराः इत्यमरः॥ वर्णादनुदात्तात्तोपधात्तो नः इयेत शब्दात् ङीप्॥ तकारस्य च नकारः स्फटिकानां रजतानां भित्तयस्ता सां छायाकांतिः॥ अन्तोमध्यमध्यान्तेष्वित्यर्थः॥ नद्धुः ज्योत्स्नाशंकाविरतिर्ज्योत्स्नाभ्रांतिं जनयतीति भ्रांतिमदलंकारः॥ २१॥ इथतइवविलासशालिन्नं मृदुपततापवनेन कंपितानि॥ २२ इथत इति॥ इहाद्रौ मृदुपततामं दवहस्तापवनेन कंपितानि पंकजानि कलिविलासशालिनं इथत इवसेविलासं नर्तयंतीवित्युत्प्रेक्षा॥ पुष्पिताग्रावृत्तं॥ २२॥ अस्मिन्नग्रयत्नमपिनाकभृतासलीलमाबद्धवेपथुरधीरविलोचनायाः विन्यस्तमंगलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरणकरेणपाणिः॥
तविलासिनीजनस्य भ्रूगतिवत्कुटिलेषु ईषत्तरंगितेष्वित्यर्थः। पयस्सु ६× टीका

१६॥

२३॥ अस्मिन्निति अस्मिन्नमलाद्रौ पिनाकभृता शिवेनाधीरविलोचनायाः चकितदृष्टेः उरगदर्शनादिति भावः॥ ईश्वरायाः गौर्याः॥ स्वेश्रभासेत्यादिनावरच्॥ पुंयोगाद्विवक्षायां ङीप्॥ आबद्धवेपथुः॥ प्राप्तकंपः इति सात्त्विकोक्तिः॥ ट्वितो थुच् जिधु चू प्रत्ययः॥ विन्यस्तमंगलमहौषधिर्यवांकुरादिर्यस्मिन्पाणिः स्रस्तउरग एव प्रतिसरो कौतुकसूत्रं यस्य तेन॥ आरः प्रतिसरो हिस्तसूत्रे च मण्डले च मंडने इति विश्वः॥ करेणसलीलमगृहीतेति देव्यस्य पार्वतीपरिनयन वर्णनं॥ ईशार्थमित्यत्र स्तनाग्रहो हि इसनृपो न रुक्तं॥ आधिक्यमेवालंकारः॥ २३॥ कामद्रिर्घनपदवीमनेकसंख्येस्तेजोभिः॥ शुचिमणिजन्मभिर्विभिन्नः॥ उस्राणांव्यभिचरतीमरुत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मसले: पर्युत्स्यन्निति निच्चयः सहस्रसंख्या ३४॥ कामदुघिरिति॥ इलाङ्गो
पन्नपदवीमाकाशंकामदुघिः प्रभुवारनेनेकसंख्ये:॥ परः सहस्रैरित्यर्थः॥
कचिदनेकवर्णैरिति प्रमादिकः पाठः वैयर्थ्यात् व्याघाताच्चेति॥ शुचिमणि=
भ्यः स्फटिकेभ्यो जन्मयेषां ते: ३४ - मयूखान्नरपरिवृत्तश्रीणि॥ अधिकरणे
पीष्यते नामतः॥ जेजो भिर्विभिन्नो विभिन्नः॥ अत एव पर्यस्यन्नपसर्पन्
समस्तसे: सवितुः रश्मीणां किरणानां निच्चयः॥ निकरः सहस्रमितिसंख्या
सहस्रसंख्या तां स्वनियमगामित्यर्थः॥ व्यभिचरतीमुअतिक्रमधा॥ तीव्रेस्फ
तेक्षण॥ ३४॥ अथ तत्र यस्मिन्नपुरमुच्चगोपुरं पुरां विजेतुर्धनजयेष्ठज्ञाप॥
ऌएषकेलासउपान्तसर्पिणः करोस्यकालास्तमयं चित्रस्यतः॥ ३५॥ अथ तेत्त

ति॥ यस्मिन्कैलासे धनाधिपः कुबेरो पुरं विजेतुः ईशानस्य धनतयसंतोषायडच्च
गोपुरं उन्नतपुरद्वारं॥ पुरद्वारं तु गोपुरमित्यमरः॥ पुरमलंकृत्य पुरीं व्यधत्तनि
र्मितवान्॥ तस्य ललाटविभागेति भावः॥ सएषः कैलासः॥ उपान्तसर्पिणः प्रांतचा
रिणोविस्थम्भतः॥ अकालेप्रतिपक्षे तद्दूरकाले अस्तमयकरितीवि सतेक्षा॥ यस्तु
तत्फलतत्कारणाभावात्मजक्तानुयोगात् गम्योत्प्रेक्षा॥ सान्योपांतवर्तनेतया
असंबंधेसंबंधलक्षणातिशयोक्त्योत्प्रेक्षाप्युपितेतिविवेकः॥ अस्तमितिमकरान्त
मव्ययं॥ तस्य पश्चाद्धं जतेनाथसंह्रनषष्ठीसमासः॥ वंशस्थवृत्तं॥ ३५॥ ननार
लञ्चाज्योतिषांसन्निपाते: घनेध्वतः सानुप्रांतरेषु॥ चक्षांच चक्षां प्रतिज्ञां काम
मुष्मिनाधावोतोभ्यातरि व्यापिलंति॥ ३६॥ नानेति॥ अमुष्मिन्नकैलासे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतः सानुषि स्यर्थः॥ विभक्त्यर्थे व्ययीभावः॥ नानारत्नज्योतिषां सन्निपा
तैः॥ व्यतिकरैः घनेषु घादितेषु॥ यादानु शान्ते सादिन्यानिपातः वप्रान्तरेषु कु
ष्कान्तरेषु वप्रांयधामभिक्ष्णवप्यांद्यस्सादितामिस्सर्थः॥ निष्पविसर्यारि
नितिनिस्सार्थे द्विर्भावः निःसानिःसमभिक्ष्णमितिकाशिकाएकपदं चैतत्॥ भि
त्तिशंकाभित्तिरितिसंदेहभावानावानभिक्ष्णमालत्॥ आङ्पूर्वाद्धात्तेशात
प्रत्ययः॥ द्विर्भाषादिपूर्वेवत्॥ भ्रान्तरीयमातंतरि क्षेम्चय मीतिग धुतीतिमा
तरिश्वावायुः॥ भ्रनुक्षंन्चितिखिन्नप्रसपातैनिपातः॥ मसुरूपेकृतिवहुलामि
तिलुक्॥ निरंतिनिवर्तयति॥ वायुसंचराक्लिस्यभानोचधार्यतावृत्ति भावः॥
अतोनिश्चयान्तरं देहालिकारः॥॥ शालिनीष्वं तं शालिन्युक्तान्नोतगोगोभ्नि

लोकैरितिलक्षणात्॥२६॥ रम्यानवधुतिरपैतिनशाद्वलेभ्यः शामी॥ भ
वस्तनुदिभं ननलिनीवनानि॥ अस्मिन्विचित्रकुसुमः स्तवकाचितानां शा
खाभृतां परिनमंतिनपल्लवानि॥२७॥ रम्येति॥ अस्मिन्नगे॥ शादाः षष्पा
णिसंसेयांधितिशाद्वलाः तेभ्यः शाद्वलः॥ शाद्वलहरिते इत्यमरः॥ ननु शाद्वलच्
प्रत्ययः॥ रम्यानवधुतिः॥ नापैति किंतु निस्यैरित्यर्थः॥ नलिनीवनानि अनु
दिवसर्वं यशामी भवंतिनकदाचित्पांडुरीभवतीत्यर्थः॥ विचित्रकुसुम
स्तव कैराचितानां व्यामानां शाखाभृतां तरुणां पल्लवानिनपरिनमंति
नजीर्णानिभवंतीत्यर्थः॥ सर्वदानूतनान्येवेत्यर्थः॥ अत्रप्रस्तुतस्यैवतत
द्वस्तुगतकांतिस्थैर्यस्य [illegible] कार्यमस्यवर्णनात्प्रस्तुतमेवकारणंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चिदसाधारणः॥कैलासस्यमहिमागम्यतेइतिपर्यायोलंकारः॥तदुक्तं॥
कारणंगम्यतेयत्रप्रस्तुतात्कार्यवर्णनात्॥प्रस्तुतत्वेनसंबंधंतमैयाधि
क्किमुच्यते॥३७॥परिसरविषयेषुलीढमुक्ताःप्रथमभक्तणोद्गमशंकुमाम
गीभिः॥इहनवशुककोमलामणीनांरविकरसंवलिताःफलंतिभासः॥३८॥
परिसरइति॥एतस्मात्परिसरविषयेषुपर्यंतदेशेषु॥विषयोदेशइतिनि
मात्तःमगीभिः॥हरितभणोद्गमशंकुयामयाकृत्तणांकुरभ्रांत्यात्यभ्रांति
मदलंकारः॥लीढाःपूर्वमास्वादिताः॥पश्चान्मुक्ताः॥लीढमुक्ताःइत्य
प्रत्यादिनावयवत्तेपूर्वकालेस्वादिनासमानाधिकरणसमासः॥
नवशुकवत्कोमलाःशुकसवर्णाइत्यर्थः॥मणीनांमकरतमणीनां

भासःरविकरैःसंवलिताःसंभिन्नाःमिश्राःसत्यःफलंतिसमुर्घ्यन्ति॥३१॥
उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धतःसरसिजसंभवःपरागः॥वात्या
निर्वियतिविवर्तितःसमंतादाधत्तेकनकमयातपत्रलक्ष्मीं॥३९॥
उत्फुल्ल विनास्याभिःसमेहेः॥वात्यादिभ्योयदितिम सत्यपः॥अमुष्मा
त्फुल्लस्थलनलिनीवनात्॥तत्पतितस्यपरागस्योद्धवात्संभ
वात्स्थलगतहणं॥उत्फुल्लसस्कृतयोरुपसंख्यानात्तनिष्ठानलंडपू
तःउत्थापितः॥वियतिसमंतादिवर्तितः॥परिमंडलितः॥अंतरा
लेतुरडायमानएवेतिभावः॥सरसिजसंभवः॥पद्मोद्भवः॥परागः
रूप्यप्रायेणसरसिजशब्दप्रयोगोदृष्टव्यः॥कनकमयातपत्रलक्ष्मी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माधत्ते॥अत्रपरागस्यआतपत्रलक्ष्मीसंबंधासंभवात्तत्सदृशीं ल
क्ष्मीमितिप्रतिबिंबाक्षेपात् असंभवद्धर्मसंबंधेयंनिदर्शनेति॥
असंभवद्धर्मयोगादुपमानोपमेययोः प्रतिबिंबक्रियागम्या यत्रसा
स्यान्निदर्शनारीति॥३९॥इत्थंसनियमयोःसुरापगायामुषसिसयावक
सव्यपादरेखा॥कथयतिशिवयोः॥शरीरयोगविषमपदापदवीवि
वर्तिनिषु॥४०॥इतीति॥इहास्मिन्उषसिप्रभातेसुरापगायांगंगायांलक्ष्मणस्य
नत्कूले॥सयावकाःसालक्तकाः॥सव्यपादस्यवामचरणस्य
रेखा॥मुद्राःपस्पाश॥यायावोल्लक्तिद्रुमापयस्समरः॥
तथाविषमाणिपदानिपदानियस्यासाविवर्तनिषुप्रदक्षिण
व

यावोल्लक्तिद्रुमापयस्समरः॥तथाचिषमाणिपदानिपदानियस्यासाविव
र्तनेषुप्रदक्षिणक्रियासुपदवीशिवयोः॥प्रदक्षिणपद्धतिरित्यर्थः॥सनियमयोः
संध्याप्रणमतोरित्यर्थः॥शिवाचशिवश्चतयोःशिवयोः॥उमाशंकरयोःपुमा
न्स्त्रियेत्येकशेषः॥शरीरयोगंअर्धांगसंघट्टनरूपंकथयति॥सनियमयो
रितिनियमेपिविलासहाविहारतः॥शिवावितिभावः॥अत्रपदवीवि
शेषणपदार्थयोःशिवयोःशरीरयोगकथनंप्रतिहेतुत्वात्काव्यलिंगम
लंकारः॥४०॥संमूर्च्छतांरजसभिन्नतिमिरवजालैराखिलपादपलतांत
रनिर्गतानां॥धर्मधुतेरिहमुहुःपटलानिधाम्नामादर्शमंडलनिभानि
समुल्लसन्ति॥४१॥संमूर्च्छतामिति॥इहास्मिन्रजतभिन्नतिमिरपजालैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमर्द्दनां वर्तुलीकृतां आलोलानां पारिप्लवानां नरूशाखानां अंतरेषु रंध्रेषु निर्गतानां प्रसृतानां धर्मघृणेर् रश्मीनां झोभाम्तां तेजसां आदर्शमंडल निभानि दर्पणप्रतिबिंबसदृशानि इति उपमालंकारः ॥ पटलानि मंडलानि मुकुः ॥ समुल्लसंति पुनः पुनः स्फुरंति ज्ञालजालेन लतानां आलोलत्वाच्छनान्य कमर्स्याषाणादि प्राभिघातपरिमंडलितो नरूदेहः ॥ शृंगाण्यमुष्य भजंते गुर्णभर्तुरुक्षाः कुर्वंति च ध्वजनमनस्सुराशांकशंफा ॥ ५२ ॥ शुक्लैरिति ॥ शुक्लैर्मयूखनिचयैः ॥ परिवीतमस्ति वप्राभिघातेन वप्रक्रीडया परिमंडलितो वर्तुलीकृतः ॥ उरः देहः यस्य सतथोक्तः गणभर्तुः प्रमथनाथस्योक्षा वृषभः ॥ उक्षा भद्रो बलीवर्द्द ऋषभो वृषभो वृष इत्यमरः ॥ यध्वजनमनस्सुराशां

कशंकांकुर्वन्ति तेषामोष्यादिरिति भावः ॥ अमुष्याद्रेः ॥ शृंगाणि भजंते ॥ अत्र शंकाशब्दस्य संदेहार्थे संदेहार्थेन काव्यलिंगेनांगांगी भावेन संकीर्यते ॥ ५२ ॥ संप्रति लब्धजन्म शनकैः कथमपि लघुनि क्षीणपयस्युपेयुषि भिदां जलधर पटले ॥ खंडितां विगतं बलभिदो धनुरिह विविधाः प्ररवितुं भवंति विभयः शिखरमणीरुचः ॥ ५३ ॥ संप्रतीति ॥ इहाद्रौ विविधाः नानावर्णाः शिखरमणीरुचः संप्रति इदानीं इत्यर्थः ॥ लघुनि अगुरुणि क्षुतःक्षीणपयसि ॥ अत एव भिदां भेदं उपेयुषि ॥ षष्ठ्यर्थे पोडिः स्पडः प्रत्ययः उपेयुषि गते जलधरपटले मेघमंडले कथमपि शनकैः लब्ध जातमित्यर्थः ॥ अत एव खंडित विगतं ह्य चिर त्स्य रूपं बलभिदो इंद्रस्य

कि० २२

पंचमसर्ग १

धनुःपुरस्तुंचिभयः समर्थाः॥ भवंति॥ अत्रेंद्रधनुषो मणिरोचिनांचा संबंधेसंबंधकथनादतिशयोक्तिरलंकारः॥ वंशपात्रपतितंस्यते॥ द्रिसुनिवंशपात्रपतितं भरत भरलगो रितिलक्षणात्॥ ४२॥ स्नपितन वरुतानरूप्रवलैरमृतलवश्रुतिशालिभिर्मयूखैः॥ सततमसितया मिनीषु शंभोर्धवलयतीह्यनांतविंदुलेखा॥ ४७॥ स्नपितेति॥ इह अतेकं भोरिंदुलेखा स्नपिता निसिक्ता॥ नितवतरुलतानां तरूणां लताप्रयाः तानि ये स्ते॥ अंमृतलवस्नुतः सा अमृतविंदुनिष्यंदनशालिंतैतैर्मयूखैः सततं सर्वकालं असितयामिनीषु कृष्णपक्षरात्रिष्वपि वनांतं धवलयसत्रत्रेने नदस्तीति क्षिपतियोनुवनं॥ पिततांच हस्तहतिकांमिवरोचनकिंरूचं॥

२२

क्षिपतीति॥ अयमनेकहिण्मयकंदरस्तवपितुर्दयितोजगतीधरः॥ ४५॥ क्षिपतीति॥ योहिमगइव अनुवनंवितताः रूचेसौवर्णीमित्सर्थः रोचनयारक्ताःरोचनकीं॥ ... रोचसाइकृटितनक्री सादिनाडीप्॥ वहद्वहतिकामिवमत्त रासंगाभिवद्वोप्रसारोत रो जरा सं गो समोयहतिकात थेसमरः॥ क्षिपतिप्र सारयति॥ अनेकाहिरण्मय्यः कंदराः यस्य सः हिरणमय इत्यक्षोढनि मतेतिनिपातनात्साधुः॥ अयंपुरोवर्तीगिरिरित्यर्थः॥ तवपितुः दयितः प्रियः॥ जगत्याः धरः॥ जगतीधरः॥ भधरः यस्तपातःलतः रोचनैर्द्धि त्युपपर्वतइत्यर्थः॥ ४५॥ सचिंजनादपयसात लितानां रोच्यतेद्वी गुणिताः सहसामसरे ॥ तेषो भूपाम्...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि० २३

पंचमसर्ग
२
२३

छिन्नसितानि पिंडयंति ४८॥ सक्तिमिति॥ अमुत्र अमुष्मिन्॥ ओष्ठे
अनिलेन बालस्फटिकलतानां अन्योन्यसंगापनयति सति सहसाहयानि च
रोचने सा चित्रैर्मयूखैः द्विगुणाः द्विरावृत्ताः कृताः द्विगुणिताः॥ गुणस्या
वृत्तिशब्दाद्द्विप्रियामुरयमत तुष्टिमितियेजयंती॥ हिरण्मयीनां हिरण्य
विकाराणां दाप्तिना येनति निपातनात् साधुः रोधोभुवां तद्भुपाभा
सः मुहुः॥ नरि छिन्नसितानि पिंडयंती अनुकुर्वती स्वर्थ उपमालंकारः
४९॥ कषणकंपनिरस्तमहाहिभिः क्षणविमत्तमतंगजवर्जितैः॥
इह मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचंदनैः॥५०॥ कष
णेति॥ इह अद्रौ कषणेन कंडूयनेन यः कंपस्तेन निरस्ताः महाहयो यै

तासर्पाः॥ येभ्यः स्तैः क्षणं विमत्तमतंगजवर्जितैः मत्तमतंगजरहितैः कुतः
मदस्नपितैः ऐरावणमदसिक्तैः गलस्नापनुवत्नं चेतिमि यादवस्य॥ हरि
चंदनैश्चंदनद्रुमैः सुरगजस्यैरावणस्य गतं प्राप्तिरनुमीयते॥ हरिचंदन
विशेषणैः काव्यलिंगमुन्नेय॥५०॥ जलजदालघनैरसितानामुपलताप्र
चयैस्तमरीचिभिः॥ भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विव
स्वतः॥५१॥ जलदेति॥ जलदजालघनैः मेघसदृशैः असितानाम् मनापि हरी
तानां मरीचिभिः॥ भानुः करो मरीचिः स्त्रीपुंसयोरित्यमरः॥ उपलतप्रचयमा
विद्युद्दीप्तसंघाना। अत एव दीपितकंदराः अप्रकाशा॥ नगवरावि
वस्वतां तिमिरस्तिमिरैः संवलितामिश्राः विभाति रसुत्रेक्षा॥५२॥ भव्यो
भयन्नपि मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्यहतप्रमादः॥ प्राय

८३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णसस्यविहितार्थकरे विधौहि श्रेयांसि लब्धुमसुखानि विनांतरायैः॥
भव्यमिति॥ इहभव्यः ज्ञातोभवन्नपिमुनेः पार्श्वस्थे आसने क्षात्रेपृथिव्यां स्थि
तः॥ गृहीतशास्त्रएवेत्यर्थः॥ हतप्रमादः॥ अप्रमत्तः सन्नृतपस्यतपस्य
रतपस्य परांकुरु॥ कर्मणि शानमथतयोभ्यायपतिंचरेतितयपुतदोक्षालपे
लिङ्॥ नचसर्वमत्तहितकारिणो मे किं प्रसादः करिष्यतीति विश्वसि
तव्यमित्यर्थः तिरस्यसिनाला प्रायेणेति॥ हियस्मात् पिणस्याराह
ल्यनप्रायोपपसिवाहुल्य इमसमरः॥ हितार्थं करोतीति हितार्थकृ
रे विधौ आपरसति श्रेयांसि अंतरायैर्विनालब्धुं असुखानि भ
व्यानीत्यर्थः॥ अतएवमयुक्तं भाव्यं॥ अतएवमज्ञाकृत्यभेदस्यपि मन्नाअमसा
नकर्तकेतिनुमुनः॥ अकारिणवैरिणः सर्वमसर्वेतस्यापि संतीति भावः॥४९॥

माभुवन्नपथहरतस्तवेंद्रियाश्वाः संतापेदिशतुशिवः शिवां प्रसक्तिं॥ रक्षं
तस्तपसि बलंचलोकपालाः कल्याणीमधिकफलांक्रियांक्रियासुः
॥५०॥ माभुवन्निति॥ तवेंद्रियाण्येवाश्वास्ते अपथेन हरंतीति अपथह
तः माभुवन्॥ अपथानेमानतीभुरित्यर्थः॥ माङि लुङि स्यादीर्घेलुङ
संतापे तपःक्लेशे सतिशिवः शिवां साध्वीयसीप्रवृत्तिं उसालिंग्दिशतु क्रियेचे
तित्यार्थः॥ लोकपालाः इन्द्रादयः तपसि विषये बलं शक्तिं रक्षंतः वर्धयंत
इत्यर्थः॥ कल्याणीं साध्वीं क्रियामनुष्ठानमधिकफलांक्रियासुः कुर्वंतु
करोतेराशिषिलिङ्॥५०॥ इत्युक्त्वासपदिहितप्रियंप्रियार्हधामस्वंग
तवतिराजेराजभस्ये॥ सोत्कंठः किमपिपृथासुतः प्रदध्यौ संधत्तेभृ
मपतिंहिसद्वियोगः॥५१॥ इ॥ नीतिप्रियार्हराजराजभस्येहतिप्रविक्तिप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि०१२५

पंचमसर्ग

प्रियहितंवचनंइतिशेषउक्त्वास्वंस्वकीयंधामस्थानंसपदिगतवति
सतिपथास्तुतोऽर्जुनःसोत्कंठंसोत्कंठंसोत्सुक्यंकिमपिप्रदध्यौचिंतया
मास॥तथाहि॥सद्वियोगःसज्जनविरोधःमनसोऽरतिंव्यथांसंपन्ने
करोतीत्यर्थः॥अथतित्तरन्यासः॥५१॥नमनतिशायनीयंसर्वतःसा
रयोगादविरहितमनेकेनांकभाजाफलेन॥अकृशमकृशलक्ष्मीमेते
नसाशंसितंसर्वथापिनंपुरुषकारंशीकमभ्याससाद॥५२॥इतिश्रीकिरा
तार्जुनीयमहाकाव्येलक्ष्मीकेभारवीकृतौहिमाचलवर्णनोनामपञ्चमः
सर्गः५॥नमितित॥अकृशाःपूर्णाःलक्ष्म्यःशोभाःयस्यसोकृशलक्ष्मीरि
तिबहुवचनाश्रितोभूतश्रीरिहः॥त्यपच्चडरः॥प्रभृतिभ्यःकनितिकमयथा
नपक्षाशः॥तथालक्ष्मीशापाप्सामर्थ्यादिवाशोभालक्ष्मीरयेषिकरयस्यापि
शेषःसोऽर्जुनःसर्वत्रशरासंयोगादुरूषयस्तुयोगादन्यथालयोगात्॥सारेव

१६४

लक्ष्मीशांशोचन्यायेपुंस्कीवेचरेत्रिषुरसभयत्रापीसमरः॥अनतिशायनीयंअ
नतिक्रमणीयंअनेकेनबहुनाअंकभाजासमीपगतेनशीघ्रभाविनेतिया
वत्फलेनकार्यसिध्याअविरहितमश्रन्यंकार्यसिध्देः॥अवश्यसाध्यकर्मित्य
र्थः॥अकृशमतनुंचेतसाआशंसितंप्रासुमिष्टंतशैलेन्द्रकीलंआसीयंपुरु
षस्यकर्मतंपुरुषाकारंउत्कृष्टविशेषणविशिष्टपौरुषमिवअभ्याससाद॥अपि
तिरुवान्मालिनीवृत्तं॥ननमयययुतेयंमालिनीभोगिलोकैः॥मस्त्रिगुरुस्त्रि
गुरुश्चयकारोभादिगुरुःपुनरादिलघुर्यः॥जोगुरुमध्यगतोरलमध्यःसोऽन्तगुरुः
कथितोऽन्तलघुस्तः॥१॥संयोगपरोदीर्घःसानुस्वारश्चविसर्गसंयुतं॥गुरुरेवतं
क्षणेरचितंयद्विपादीस्वरविपर्ययान्तं॥इतिश्रीमहोपाध्यायकोलाचलमि
ल्लिनाथसूरिरचितायांकिरातार्जुनीयव्याख्यायांघंटापथसमाख्यायां
रघाचोमाच्चलोलि॥घंटापथमाख्ये॥पञ्चमःसर्गः॥श्रीगजाननपतिपेन
॥५२॥ ५२॥ ५॥ ५२॥ ५२ ॥५२॥५२॥ ५२८८ ५२

२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।कि०।।
२६

।।पंचमसर्गः

।।अयंसर्गौकिरीतिनस्य ... हस्तेन लिखि ... तोमया।। कश्चित् शुध्दो ... शुध्दो
ष
वा ... परमेश्वर ।। इयंप्रार्थनाकृता ।। श्रीगुरु ... रचेन म ।।५।।

२६।।

KKSU LIBRARY
RAMTEK
441 106
M 1365
Dist. Nagpur

(26)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 12:56
,TRANSFERRED=2020/10/22 at 12:59:09
,PAGES=26
,TYPE=STD
,NAME=S0004382
,Book Name=M-1365-KIRATAJUNIYAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection